# shrIvallabhAShTakam 1

# श्रीवल्लभाष्टकम् १

## Document Information

Text title : vallabhAShTakam 1

File name : vallabhAShTakam1.itx

Category : deities_misc, gurudev, puShTimArgIya, aShTaka

Location : doc_deities_misc

Author : viThThaladIkShita

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrIvallabhAShTakam 1

# श्रीवल्लभाष्टकम् १

श्रीमद्वृन्दावनेन्दुप्रकटितरसिकानन्दसन्दोहरूप-
स्फूर्जद्रासादिलीलाऽमृतजलधिभराक्रान्तसर्वोऽपि शश्वत् ।
तस्यैषात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासीद्-
भूमौ यः सन्मनुष्याकृतिरतिकरुणस्तं प्रपद्ये हुताशम् ॥ १॥

नाविर्भूयाद्भवांश्चेदधिधरणितलं भूतनाथोदितास-
न्मार्गध्वान्तान्धतुल्या निगमपथपतौ देवसर्गेऽपि जाताः ।
घोषाधीशं तदेमे कथमपि मनुजाः प्राप्नुयुर्नैव देवी-
सृष्टिर्व्यर्था च भूयान्निजफलरहिता देववैश्वानरैषा ॥ २॥

न ह्यन्यो वागधीशाच्छ्रुतिगणवचसां भावमाज्ञातुमीष्टे
यस्मात्साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव ।
तस्माच्छ्रीवल्लभाख्य त्वदुदितवचनादन्यथा रूपयन्ति
भ्रान्ता ये ते निसर्गत्रिदशरिपुतया केवलान्धन्तमोगाः ॥ ३॥

प्रादुर्भूतेन भूमौ व्रजपतिचरणाम्भोजसेवाख्यवर्त्म-
प्राकट्यं यत्कृतं ते तदुत निजकृते श्रीहुताशेति मन्ये ।
यस्मादस्मिंस्थितो यत्किमपि कथमपि क्वाप्युपाहर्तुमिच्छ-
त्यद्धा तद्गोपिकेशः स्ववदनकमले चारुहासे करोति ॥ ४॥

उष्णत्वैकस्वभावोऽप्यतिशिशिरवचःपुञ्जपीयूषवृष्टी-
रार्तेष्वत्युग्रमोहासुरनृषु युगपत्तापमप्यत्र कुर्वन् ।
स्वस्मिन् कृष्णास्यतां त्वं प्रकटयसि च नो भूतदेवत्वमेत-
द्यस्मादानन्ददं श्रीव्रजजननिचये नाशकं चासुराग्नेः ॥ ५॥

आम्नायोक्तं यदम्भोभवनमनलतस्तच्च सत्यं विभोर्य-
त्सर्गादौ भूतरूपादभवदनलतः पुष्करं भूतरूपम् ।
आनन्दैकस्वरूपात्त्वदधिभु यदभूत्कृष्णसेवारसाब्धि-
श्चानन्दैकस्वरूपस्तदखिलमुचितं हेतुसाम्यं हि कार्ये ॥ ६॥

स्वामिच्छ्रीवल्लभाग्ने क्षणमपि भवतः सन्निधाने कृपातः
प्राणप्रेष्ठव्रजाधीश्वरवदनदिदृक्षार्तितापो जनेषु ।
यत्प्रादुर्भावमाप्नोत्युचिततरमिदं यत्तु पश्चादपीत्थं
दृष्टेऽप्यस्मिन्मुखेन्दौ प्रचुरतरमुदेत्येव तच्चित्रमेतत् ॥ ७॥

अज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्या-
मग्नित्त्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव ।
प्रादुर्भूतो भवानित्यनुभवनिगमाद्युक्तमानैरवेत्य
त्वां श्रीश्रीवल्लभे मे निखिलबुधजना गोकुलेशं भजन्ते ॥ ८॥

इति श्रीमद्विठ्ठलदीक्षितविरचितं श्रीवल्लभाष्टकं १ समाप्तम् ।

Proofread by PSA Easwaran

---

*shrIvallabhAShTakam 1*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*